श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमत् मैसूर् आण्डवन् श्री श्रीनिवासरामानुजमहादेशिकैः अनुगृहीता

# ॥ दोम्बविल्लि श्रीनिवासपञ्चश्लोकी ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुजमहादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ दोम्बविल्लि श्रीनिवासपञ्चश्लोकी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेङ्कटनाथदेशिकशिरोरत्नप्रभोक्त्युल्लसत्-
लक्ष्म्या वेङ्कटशैलराट्दयितया जुष्टो दयारूपया।
बोम्बाय्पतनभागधेयमहितश्रीदोम्बविल्यां पुरि
श्रीवासोऽभिनवालये विजयते दाताऽऽश्रितेभ्यः श्रियः॥ १ ॥

लोकाः पादारविन्दद्वयमिह नमतानन्दताऽविन्दतेष्टम्
श्रीशः तिष्ठन् समस्तप्रणतवशकरं त्वेतदेवेति हस्तात्।
संसाराम्भोधिसन्तारणं अतिसुलभं नात्यगाधस्त्वियानि-
त्यन्यं विन्यस्त हस्तं कटितट उरुगायोऽनुगृह्णाति भक्तान्॥ २ ॥

त्यक्त्वानन्दं पदं तत् परममिह समायादसौ श्रीनिवासः
ब्रह्माण्डे वेङ्कटाद्रौ सुकृतिपरिचिते सर्वसम्पत्समृद्धे।
पुण्यक्षेत्रैककेन्द्रे चिरतरमथ सर्वत्र शक्तिप्रदानात्
मूर्तीराविश्य सर्वप्रद इह लसतात् सर्वदाऽऽसूर्यचन्द्रम्॥ ३ ॥

श्रीशैले श्रीनिवासः परमकरुणया नित्यवासाभिलाषी
नानादेशीयभक्तैः उपचितसुकृतैः सेवितोऽभीष्टदायी।
प्रेन्ध्यां कालक्रमात् यः समुचितनगरे तत्र तत्र स्वशक्त्या
प्रादुर्भूयाऽखिलेभ्यो दददतुलफलं भ्राजते स्वेन भूम्ना॥ ४ ॥

श्रीमद्वेदान्तरामानुज गुरुवरनिर्मापिते मन्दिरेऽस्मिन्
स्थेयान् श्रीशैलवासी विलसतु सकलाभीष्टदः श्रीनिवासः।
आचन्द्रार्कं श्रितेभ्यः शुभगुणमहिताः सन्तु दीर्घायुषः ते
श्रीमत्यां दोम्बविल्यां शुभततिरनुयात्वन्वहं क्षेमदात्री॥ ५ ॥

www.prapatti.com

स्तुतिरियमनवद्या पञ्चपद्या फलाप्त्यै
    जयतु विबुधनुत्या सर्वदा सर्वदेशे।
गुरुवरपदपद्मासेविगोपालगीता
    पठत सुमनसेमां सर्वदा सिद्धिदाः स्युः॥ ६ ॥

॥ इति दोम्बविल्लि श्रीनिवासपञ्चश्लोकी समाप्ता॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

www.prapatti.com